# Batormangalam

# बटोर्मङ्गलम्

## Document Information

Text title : Batormangalam

File name : baTormangalam.itx

Category : misc, shrIdharasvAmI, stotra, mangala, panchaka

Location : doc_z_misc_general

Author : Shridharasvami

Description/comments : shrIdharasvAmI stotraratnAkara

Acknowledge-Permission: Upendra Shripad Dasare, https://shridharamrut.com

Latest update : November 8, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 13, 2022

*sanskritdocuments.org*

# बटोर्मङ्गलम्

(शार्दूलविक्रीडितवृत्तं )
धर्मो वैदिक एष ते भगवतः साक्षान्मुखान्निःसृतः
सर्वश्रेष्ठ इतीह सर्वजगतः कल्याणकृत्तन्वतः ।
धर्मं पालय यत्नतः सुकृतिनः सेवस्व शुद्धां कृतिं
सद्विद्यां सुमतिं विधाय भगवान् कुर्याद्बटोर्मङ्गलम् ॥ १॥

आशीर्मे सततं समुल्लसतु ते धर्मात्मने हे बटो
विद्यामार्जय सन्मतिं शुभगुणान् सेवस्व विद्वज्जनान् ।
सन्ध्योपासनमुत्तमं कुरु मुदा शीलेन राजस्व भोः
सर्वे ते गुरवो मुनीन्द्रकवयः कुर्वन्तु ते मङ्गलम् ॥ २॥

भायां ब्रह्मण एव यो रत इति स्वानन्दतृप्तः सदा
ख्यातो यो जगतीतले सुमहसा तत्त्वार्थवेत्तेति च ।
यत्रायं भगवानवातरदहो देशः स ते भारतः
देशो भारत एष तेऽवतु बटो कुर्यात्सदा मङ्गलम् ॥ ३॥

येषां पावनजीवनं कृतिरपि स्तुत्या विशुद्धा सदा
वाणी सत्यभृता तथात्रिमधुरा तत्त्वप्रबोधात्मिका ।
वेदज्ञानरताः स्वधर्मनिरताः शान्ताश्च दान्ताश्च ये
आर्यास्ते सततं बटो सुविमलाः कुर्वन्तु ते मङ्गलम् ॥ ४॥

धन्यस्त्वं सुकुलोद्भवोऽसि विमलश्चाचारनिष्ठो व्रती
तेजस्वी खलु वामनेन सदृशो वर्धिष्णुरेवं जयी ।
मान्यान्मानय मातृतातभजनं कुर्वन् गुरोश्चादि तत्
देवान्पूजय हे बटो प्रभुवराः कुर्वन्तु ते मङ्गलम् ॥ ५॥

॥ इति बटोर्मङ्गलं सम्पूर्णम् ॥

उपनयन समयः वैशाख वद्य ४, शके १८८४

रचनास्थळ ः प्रसन्न सदन, पुणे

---

*Batormangalam*

pdf was typeset on November 13, 2022

Please send corrections to *sanskrit@cheerful.com*